# श्रौतयज्ञप्रक्रिया-पदार्थानुक्रमकोषः

## ( दैवद्रव्ययज्ञप्रकाशः )

( आदिनान्तः प्रथमः भागः )

प्रणेता

ब्रह्मलीन पण्डित पीताम्बरदत्त शास्त्री

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# कोषनिर्माता

## पं० पीताम्बरदत्त शास्त्री जी का परिचय

याज्ञिक प्रक्रिया के परम् विद्वान् पंडित पीताम्बरदत्त शास्त्री का जन्म १७ मई १९०६ को गढ़वाल जिले के थलासू ग्राम में हुआ। यह ग्राम अब भी यज्ञ-यागादि अनुष्ठानों के लिए सुख्यात है। पंडित जी ने १९२९ में पंजाब विश्वविद्यालय लाहौर से शास्त्री परीक्षा उत्तीर्ण की।

आप डी०ए०वी० कालेज लाहौर के रिसर्च विभाग में पूर्व अप्रकाशित वाल्मीकीय रामायण के बालकाण्ड (North-Western Recension) के प्राचीन हस्तलेखों के आधार पर चल रहे आलोचनात्मक सम्पादन कार्य के लिए १९३० में नियुक्त हुए। उस समय विभाग के अध्यक्ष स्व० पं० भगवद्दत्त जी, बी०ए० थे। उनकी निवृत्ति के पश्चात् सन् १९३४ में आचार्य विश्वबन्धु जी, एम०ए०, एम०ओ०एल०, शास्त्री, दयानन्द ब्राह्म महाविद्यालय के प्रिंसिपल नियुक्त हुए। तत्पश्चात् स्वर्गीय आचार्य विश्वबन्धु जी ने वि० वैदिक शोध-संस्थान के संचालक पद को सम्भाला। इन दोनों अध्यक्ष महोदयों की अध्यक्षता में पण्डित पीताम्बरदत्त जी अन्य सहयोगी कार्यकर्त्ताओं के साथ शोधकार्य करते रहे।

आरम्भ से ही प्राचीन हस्तलेखों के अध्ययनकार्य के साथ सम्पर्क होने के कारण उनका कार्य, पूर्व अप्रकाशित मूल, भाष्य, व्याख्या आदि के प्राचीन नाना हस्तलेखों के मेल (कुलेशन) से, आलोचनात्मक पद्धति से उनके सम्पादन में सहयोग देना रहा। इसके साथ सुप्रसिद्ध वैदिकपदानुक्रमकोष के चतुर्थ (वेदाङ्ग) भाग में नियुक्ति से श्रौत-विषयक याज्ञिक प्रक्रिया में उनकी विशेष रुचि रही। इसी के परिणामस्वरूप उनके सहयोग से संकलित कार्य का प्रकाशन सन् १९३१ से १९६७ तक चला।

वाल्मीकीय रामायण (पश्चिमोत्तरशाखीय) के अयोध्याकाण्ड को छोड़कर (जिसका प्रकाशन उनके आने से पूर्व हो चुका था) अन्य छ: काण्डों के प्रकाशन में पं० पीताम्बरदत्त जी पर्याप्त सहयोग देते रहे। बालकाण्ड १९३१ में प्रकाशित हुआ। इसके प्रधान सम्पादक पं० भगवद्दत्त जी थे। अरण्यकाण्ड १९३५ में प्रकाशित हुआ। इसके प्रधान सम्पादक श्री पं० विश्वबन्धु जी तथा पं० भगवद्दत्त जी थे। तदनन्तर किष्किन्धाकाण्ड १९३६ में, सुन्दरकाण्ड १९४० में, युद्धकाण्ड १९४४ में और उत्तरकाण्ड १९४७ में डायरैक्टर पद्मभूषण स्व० आचार्य विश्वबन्धु जी की प्रधान-सम्पादकता में प्रकाशित हुए।

नानां त्रिशद्दिनेषु समाप्तिविधानात्। द्र० अहीनसत्राहर्गणानामङ्गप्रधानविधि-अहीन -अहीनसत्रशस्योपाय— ।

**अन्तापच्छिन्नकर्मन्**—(सा०) इष्टिपशुसोमयज्ञेषु १—सामान्यतः 'प्रकृतिवद् विकृतिः कर्तव्या' इति शास्त्रेण सर्वेषामङ्गानां प्रकृतितोऽतिदेशप्राप्तौ कानिचिदङ्गान्यनुष्ठाय अवशिष्टानामङ्गानामपच्छेदः परित्यागो यत्र विधीयते तत् अन्तापच्छिन्नं कर्मोच्यते। २. अपच्छिन्नः परित्यक्त अन्तः अवशिष्टभागो यस्य कर्मणः तत् कर्मान्तापच्छिन्नं भवतीत्यर्थः। यथा 'इडान्तम्', 'शंय्वन्तम्', इत्यादिषु विधिषु इडापर्यन्तं शंयुपर्यन्तं मेषातिदिष्टं कर्म क्रियते शिष्टं प्रकृतिप्राप्तं परित्यज्यते इति। द्र० अन्त— ।

**अन्तापत्त्यनुवचनधर्म**—(हौ०)इष्टियज्ञेषु प्रकृतिभूते हविर्यागानां तृतीये दर्शपूर्णमासप्रकरणे तद्विकृतिषु अन्यत्र पशुसोमेषु च यथा सामिधेन्यनुवचने अन्यत्राभिष्टवनशस्त्रानुवचनेषु च एकस्या ऋचः द्वयोर्वा ऋचो रनुवचने त्रिः, प्रथमा त्रिरुत्तमा'इति अभ्यासो न भवति। सामिधेन्यनुवचने अध्यर्धकारं पठनं विशेषधर्मस्तथा अनुवचनमात्रे अवसाने यः प्रणवः स चतुर्मात्रौ भवति, अन्यत्र तु त्रिमात्र एव तस्य प्रणवस्यान्तिमस्य मकारस्य स्थाने स्पर्शेषु परेषु तत्तद्वर्गीयस्य पञ्चमो वर्ण आदेशो (विकारो) भवति। यवलेषु परेषु क्रमेण अनुनासिका यवला आदेशा भवन्ति। रेफोष्मसुपरेषु अनुस्वारः आदेशो भवति। अन्यत्र अविकृत एव मकारः (प्रयुज्यते) तदिदं प्रणवमकारस्य एवं भूतमादेशरूपं विकारमात्रम् अन्तापत्तिरूपोऽनुवचनधर्म इत्युच्यते (तु०— आ०श्रौ० १।२।१५-१८)। द्र० श्रौ०प०नि० पृ० २४, अध्यर्धकारम्, अनुवचन-, अनुवचनधर्म, अनुस्वार— । अन्तिम प्रवर्ग्यसंबन्धिशालामुखीयोपस्थान-द्र० शालामुखीयोपस्थान— ।

**अन्तिमयूपोपस्थान**—(आध्व०) पशुयज्ञेषु ऐन्द्राग्नप्रकृतिके निरूढपशुबन्धप्रकरणे अग्नीषोमीये तत्पशुप्रकृतिकेषु सौमिकेषु पशुषु च पाशुकादित्योपस्थानानन्तरम् 'आशासानः' इत्यादि 'यजमानाय तिष्ठ' इत्यन्तेन मन्त्रेणान्तिमं यूपमुपतिष्ठते इति। तदिदमन्तिमयूपोस्थानमुच्यते। द्र० श्रौ०प०नि० पृ० १४, श्रौ०को० १ भा० पृ० ६०२, पाशुकादित्योपस्थान— ।

**अन्त्य**—(औ०, सा०) सोमयज्ञेषु प्रकृतिभूतज्योतिष्टोमातिरात्रप्रकरणे प्रथमायां सोमसंस्थायामग्निष्टोमे तद्विकृतिषु चैकाहाहीनसत्रेषु माध्यन्दिनपवमानस्तोत्रे आभर्वपवमानस्तोत्रे चार्षेयकल्पे सर्वत्र प्रयुक्तोऽन्त्यशब्दो माध्यन्दिनार्भवपवमानयोरन्त्यम् (अवसानम्) ब्रवीति। तु०— आर्षेयकल्पे वरदराजः।

**अन्न**—(सा०) १-अन्नमेव तद्दक्षिणतो निदधाति, तस्माद्दक्षिणेन हस्तेन पुरुषोऽन्नमत्ति। २. अन्नमेवोभयतो निदधाति, तस्मादुभाभ्यां हस्ताभ्यां परिगृह्य पुरुषोऽन्नमत्ति।

**अन्नप्रकार**—(सा०) १- अश्यं, खाद्यं, चोष्यं, लेह्यं, पेयमिति पञ्च- विधमन्नमुच्यते (तु०— तां० ब्रा० सा० ५।२७)।

२. अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्। (गीता)।

**अन्नाद्य**—(सामान्य)—१. ओदनादिकमन्नाद्यमुच्यते। २. अन्नाद्यशब्दो भोगवचनः। (तु० द्रा०श्रौ० धन्वी० ३,२)।